॥ भट्टर-महाविद्यालयः, दाँतन ॥

<u>संस्कृत-विभागः</u>

# Course Outcomes, Programme Outcomes & Programme Specific Outcomes

2018-2019

<u>पाठ्यक्रमस्य परिणामः(Course Outcome)</u>

<u>मूलपाठ्यक्रमः(Core Course)</u>

१. <u>महाकाव्यम्</u>

१. विविधमहाकाव्यानामुत्पत्तेः क्रमविकाशस्य च धारणा। कालिदास-माघा-श्वघोष-भट्टि-भारवि-श्रीहर्षादिमहाकवीनां कीर्त्तयः, काव्यप्रतिभाः, रचनाशैल्यः भाषादक्षताश्च छात्रैः विज्ञेयाः।

२. रघुवंशम्, कुमारसम्भवम्, किरातार्जुनीयं चेति महाकाव्यानां रचयितुः परिचयज्ञानं महाकाव्यगतविषयज्ञानं च।

३. विषयदृष्ट्या महाकाव्यानां नामकरणं तथा साहित्यतत्त्वदिशा नामकरणम् इति विषये याथार्थ्यनिरूपणपद्धतीनाम् अवगमनम्।

४. पाठ्यांशानां व्याकरणज्ञानम्, अनुवादशिक्षणं व्याख्यानसामर्थ्यं च। छात्राः श्लोकानां छन्दालंकारनिरूपणं विजानीयुः।

५. महाकाव्यानां आलंकारिकोत्कर्षापकर्षविचारे समर्थाः भवेयुः विद्यार्थिनः। महाकाव्ये गुणरीतिरसादीनामन्तर्भावविषये विज्ञाता भवन्तु।

६. छात्रजीवने मूल्यबोधार्जने महाकाव्यगताख्यानानां पाठग्रहणम्। यथा- किरातार्जुनीयमहाकाव्ये प्रभुं युधिष्ठिरं प्रति भृत्यस्य वनेचरस्य व्यवहारावबोधनम्। रघुवंशमहाकाव्ये कामधेनुं गाभीं अवज्ञायन्तः दीलिपस्य शापप्राप्तिः। प्रजाः प्रति राज्ञो दीलिपस्याचरणम्। कुमारसम्भवे पतिं शिवं प्राप्तुं पार्वत्याः तपश्चरणम्।

७. प्राचीनभारतीयसमाजसंस्कृतिविषये छात्राणां सम्यग्ज्ञानं भविष्यति। माघविरचितात् शिशुपालवधमहाकाव्यादध्येतारः महाभारतयुगस्य राजनीतिं समाजनीतिं च ज्ञास्यन्ति।

८. रघुवंशमहाकाव्यस्य मूलं छात्राणामवश्यमेव ज्ञातव्यम्। ग्रन्थोक्तानि राजेन्द्रनामानि शिक्षार्थिनः जानीयुः।

## २. गीतिकाव्यम्

१. संस्कृतगीतिकाव्यानामुत्पत्तेः क्रमविकाशस्य च पूर्णाङ्गः परिचयो लभ्यते।

२. कालिदास-विल्हण-जयदेव-अमरु-भर्त्तृहरीत्येतेषां कवीनां रचनाः, शैल्यः काव्यवैशिष्ठ्यानि गीतिमयता चेत्येते विषयाः विज्ञेयाः।

३. नीतिशतकमिति शतककाव्यस्य व्याकरणज्ञानम्, अनुवादशिक्षणं व्याख्यानसामर्थ्यं च।

४. वर्तमानसमाजे नीतिशतकान्तर्गतश्लोकानामुयोगित्वमवगमनम्।

५. छात्राणां चरित्रगठने नैतिकमूल्यवर्धने च नीतिवाक्यानां सहायत्वम्।

६. गीतिकाव्येषु गीतिधर्मिताविषये ज्ञानार्जनं तथा तद्गतनीतिकथानां श्रवणं मननमात्मप्रत्ययाभिवर्धनं च।

७. नीतिकाव्यगतसुभाषितानामुच्चारणं ,कण्ठस्थीकरणं स्वजीवने उपयोगित्वं च कथं भवेदिति शिक्षार्थिभिः विशेषेणावगम्यते।

## ३. गद्यकाव्यम्

१. गद्य-गल्पसाहित्यानामुत्पत्तेः क्रमविकाशस्य च इतिहासज्ञानम्। गद्य-गल्पकाराणां परिचयः सविशेषेण ज्ञातव्यः।

२. समकालिकसमाजे गद्यकाव्यानां तथा गल्पग्रन्थानां गुरुत्वनिरूपणे छात्राः समर्था भवेयुः।

३. महाश्वेतावृत्तान्तस्य, शुकोनासोपदेशस्य विश्रुतचरितस्य च व्याकरणज्ञानम्, अनुवादशिक्षणं व्याख्यानसामर्थ्यं च प्राप्यते। वाणभट्टस्य दण्डिनश्च कालः, रचनारीतिः गद्यप्रकारश्चेति विषये ज्ञानं लभन्ते।

४. सुवन्धुः, दण्डी, वाणभट्टः अम्बिकादत्तव्यासश्चेत्येतेषां गद्यकाराणां रचनाः, रचनोत्कर्षताश्च छात्राः ज्ञास्यन्ति।

५. पञ्चतन्त्र-हितोपदेश-वेतालपञ्चविंशति-पुरुषपरीक्षादीनां गल्पग्रन्थानां कथाः पठिष्यन्ति तद्गतनैतिकमूल्यानि च अवबुध्य स्वचरित्रमभिवर्धयिष्यन्ति।

६. शुकनासोपदेशादिषु गद्यकाव्येषु कथिता आयुर्वेदभावना, राजनैतिकचिन्ता, समाजव्यवस्था, यौवनोन्मत्तता संजितेन्द्रियता चेति विद्यार्थिभिः विज्ञायन्ते।

७. अम्बिकादत्तव्यासरचितं शिवराजविजयमित्याधुनिकगद्यकाव्यमपि छात्राः अध्ययेयुः। तत्र पुराणपुरुषशिवाजीचरितविषये ज्ञानं प्राप्स्यन्ति।

४. <u>रामायणं महाभारतञ्च</u>

१. जातीयमहाकाव्ययोः रामायणमहाभारतयोराख्यानोपाख्यानविषयविज्ञानम्।

२. रामयण-महाभारतयोः रचयितुः परिचयः अध्येतृभिः ज्ञायते।

३. रामायण-महाभारतयोः रचनाकालनिरूपणे समर्था भविष्यन्ति। महाभारताध्ययनेन भारतवर्षस्य इतिहासज्ञानं लभन्ते।

४. आदिकाव्यत्वेन रामायणस्य महत्वमवबुध्यते। विविधदेशेषु प्रदेशेषु च दैनन्दिनजीवने समाजे च रामकथायाः प्रभावः विज्ञायते।

५. जय-विजय-भारत-महाभारतत्वेन ग्रन्थस्य विकाशधारां छात्राः सम्यक् ज्ञातुं शक्नुवन्ति।

६. अपरकाव्यानामुत्सरूपेण रामायण-महाभारतयोरवस्थानं विद्यार्थिभिः ज्ञायते।

७. महाभारतमेकः ज्ञानकोषो विश्वकोषो वा। महाभारतगतनवशब्दानां पठनेन छात्राणां संस्कृतशब्दभाण्डारः वर्धते।

८. छात्राः द्वयोः महाकाव्ययोः साहित्यिकगुरुत्वं तथा सांस्कृतिकगुरुत्वं ज्ञास्यन्ति।

५. <u>पुराणम्</u>

१. पुराणानामख्यानोपाख्यानविषये छात्राणां ज्ञानं भविष्यति।

२. महापुराणानां तथोपपुराणानां संख्या, विषयः, रचनाशैली, काव्यतत्त्वं चेति विषयान् ज्ञास्यन्ति।

३. पुराणानां लक्षणं, वैशिष्ट्यं, रचयिता चेत्येतस्मिन्विषये विद्यार्थिनः ज्ञानं लभन्ते।

४. भारतवर्षस्य इतिहासज्ञाने पुराणानामुपयोगित्वं विज्ञायते छात्रैः।

५. समाजे साहित्ये संस्कृतिक्षेत्रे च पुराणानां प्रभावनिरूपणसमर्था भविष्यन्ति छात्राः।

६. <u>श्रीमद्भगवद्गीता</u>

१. उपनिषद्-गीता-वेदान्तदर्शनञ्चैतानि त्रीणि शास्त्राणि प्रस्थानत्रयीति कथ्यते। शिक्षार्थिनः शास्त्राण्येतानि ज्ञातुं शक्नुवन्ति।

२. श्रीमद्भगवद्गीता भारतवर्षस्य प्राणस्वरूपा। तस्या अध्ययनेन छात्राः स्वचरित्रं रचयितुं समर्था भविष्यन्ति। गीतायाः उपदेशपठनेन छात्राणां जीवने मूल्यबोधस्य विकाशो भवति।

३. गीतायाः भक्तियोगमाध्यमेन भक्तिविषये ज्ञानं भविष्यति। योगविषये अध्येतृणामवबोधनं भवति।

४. मनोबुद्ध्यात्माविषये विस्तारेण अवगच्छन्ति छात्राः। सूक्ष्मशरीराणां तथा स्थूलशरीराणामवयवान् , तेषां कार्यप्रणालीश्चेत्येतान् ज्ञास्यन्ति।

५. गीतायामिन्द्रियाणां संयमविषये किमुपदिष्टमिति जानीयुः।

६. मनःसंयोगस्तथा मनःसंयमविषयाः छात्रजीवने अवश्यं ज्ञातव्याः। श्रीमद्भगवद्गीताध्ययेनन सद्ययौवनप्राप्तानां विद्यार्थीनां चञ्चलचित्तसंयमो भविष्यति। इन्द्रियाणां संयमे गीताायाः द्वितीय-षष्ठाध्याययोः विस्तारेण अध्ययनं कृत्वा छात्राः मनःसंयोमः, भोजनसंयमः, हृदयदौर्वल्यं, मानसिकशिक्षा चेत्येतान् विषयान् विज्ञास्यन्ति।

७. आत्मसंयमोपायः, भक्तिमाध्यमेन आत्मप्रबन्धनम्, कामक्रोधादिशरीस्थाः षड्-रिपूनां दमनम्, नीतिशिक्षार्जनम्, चित्तप्रसन्नतायाः उपायः, सत्त्वरजोतमाभिधागुणत्रयाः इत्येतानि विषययुतज्ञानानि श्रीमद्भगवद्गीतायाः श्लोकाध्ययनेन लभ्यन्ते।

८. भगवतः श्रीकृष्णस्योपदेशात्मकं मानवजीवने शाश्वतप्रयोजनात्मकं सर्वविधं ज्ञानं गीतायां निहितं वर्तते। विद्यार्थिभिः आत्मसंयमे, चरित्रगठने, मानवतार्जने गीतायाः सहायत्वं गुरुत्वं च अवबुध्यन्ते।

९. गीतायाः ज्ञानयोगाध्ययनेन शुभाशुभफलविचारे समर्था भविष्यन्ति। छात्राणां चरित्रगठने सहायो भविष्यति।

७.**<u>अलंकारशास्त्रम्</u>**

१. आलंकारिकाणां अलंकार-प्रस्थानस्य च परिचयः छात्रैः ज्ञायते।

२. काव्यालंकारसूत्रवृत्तौ काव्यालंकारस्य भूमिका, काव्यस्य प्रयोजनम्, कवीनां भेदः, रीतयः, शव्दार्थगुणाः, काव्याङ्गानि, गुणालंकारयोः भेदः इति विषये सुष्ठुतया अवगम्यते।

३. साहित्यदर्पणस्य षष्ठपरिच्छेदे नाटकस्य, प्रकरणस्य, प्रहसनस्य, महाकाव्यस्य, गद्यकाव्यस्य च लक्षणम् वोध्यव्यम्।

४. साहित्यदर्पणस्य दशमपरिच्छेदे शब्दार्थालंकाराणां लक्षणस्य भेदस्य च परिचयः ज्ञातः।

५. लक्षणसहयोगेन श्लोकस्य अलंकारनिर्णयपद्धतेः ज्ञानं भवति।

६. अलंकारशास्त्रस्य षट्-प्रस्थानानां सम्यग्विवरणं प्राप्यते।

८. <u>आधुनिकसंस्कृतसाहित्यम्</u>

१. आधुनिकसंस्कृतसाहित्यस्य आधुनिकवङ्गीयसंस्कृतकवीनां च साधारण-परिचयः प्राप्यते।

२. साम्प्रतिकविषयमवलम्व्य रचितग्रन्थविषये परिचयं प्राप्य आधुनिकश्लोकं रचितुं समर्थाः स्युः।

३. अर्वाचीनग्रन्थं पठित्वा सामाजिकसमस्यायाः समाधातुं समर्थाः भविष्यन्ति।

९. <u>वेदः</u>

१. को नाम वेदः, वेदस्येतिहासः, वेदस्य विषयवस्तु , वेदस्य प्राचीनत्वम्, वेदस्य कालः इति विषये साधारणज्ञानं अवगम्यते।

२. सूक्ते वर्णितदेवताणां स्वरूपं वैशिष्ट्यञ्च सम्यकरूपेण ज्ञायते।

३. मन्त्रस्य विनियोगविषये, वैदिकस्वरेण पदपाठनिर्णये च समर्थाः भविष्यन्ति।

४. लौकिकव्याकरणवत् वैदिकव्याकरणेपि धातुरूपाः, सन्धयः, प्रत्ययाः, उपसर्गाः इत्यनेन सह सूत्रस्य वैदिकशब्दनिर्मातुं शक्नुवन्ति।

५. वैदिकव्याकरणे विशेषतया लेट्-लकारस्य प्रयोगः दृश्यते।

६. वेदे संवादसूक्तस्य प्रयोजनं परिचयश्च, दार्शनिकसूक्तस्य दार्शनिकतत्वं तात्पर्यञ्च ज्ञायते।

७. प्राचीने तथा वैदिककाले समाजस्य रीति-नीतिः, नारीणां प्राधान्यं गुरुत्वञ्च प्राप्यते।

८. वेदस्य व्राह्मणांशे यागादिषव्विवरणं विस्तृततया ज्ञायते। वृहत्व्राह्मणग्रन्थः खलु शतपथव्राह्मणम्। तत्र सृष्टिसंक्रान्तपुराणकथायाः मनोः प्रलयस्य च उल्लेखः अस्ति।

९. शतपथब्राह्मणस्य आख्यानेषु प्रसिद्धा खलु मनुमत्सकथा। आख्यानेऽस्मिन् वर्ण्यते युगान्तरे सृष्टेः ध्वंसः अभवत् , पुनः नवरूपेण जीवजगतः सृष्टिरभवतिति।

१०.अरण्यांशे अरण्यवासितपस्वीनां ध्यानस्य वर्णना आलोचिता।

११. वेदस्य सुष्ठुतया अवगमनाय रक्षणाय च प्रसिद्धानां षड्वेदाङ्गानां ज्ञानं भवति।

१०. <u>उपनिषद्</u>

१. उपनिषदः प्रधाना आलोच्यविषया ब्रह्मविद्या। ब्रह्मविद्यायाः स्वरूपं, जीव-ब्रह्मणोः सम्वन्धः, अनुवन्धचतुष्टयम् इति विषयान् जानीमः।

२. ईशोपनिषदि ज्ञाननिष्ठायाः उपदेशस्य, निष्कामकर्मयोगेन समग्रवन्धनमुक्तेः उपायस्य च ज्ञानं भवति।

३. आत्मज्ञ-अनात्मज्ञोः प्रार्थक्यं निर्दिश्य आत्मनः उत्कर्षविषये ज्ञातवन्तः।

४. वृहदारण्यकोपनिषदि याज्ञवल्क्य-मैत्रेयीसंवादेन ब्रह्मणः ज्ञानविषये सुपष्ठधारणा प्राप्यते।

५. आत्मज्ञानोपायानां शम-दम-तितिक्षादीनां ज्ञानं भवति।

११.<u>संस्कृतव्याकरणम्</u>

१. व्याकरणे कारकप्रकरणं येन नाधीतं तेन शुद्धं वाक्यमेव प्रयुक्तं न शक्यते अतः कारकप्रकरणं पठनीयम्।

२. कारकज्ञानेन विभक्तिज्ञानमपि अवगम्यते।

३. संस्कृतजगति केचन विशेषधातवः सन्ति येषां प्रयोगे निर्दिष्टं कारकमेव भवति। यथा- रुच्धातुयोगे सम्प्रदानकारकमेव भवति।

४. केषाञ्चित् विशिष्टशव्दानां प्रयोगे केचन उपपदविभक्तयः भवन्ति।

५. कदाचित् केषाञ्चित् विशिष्टशव्दानां केषाञ्चित् विशिष्टार्थगम्यमाने एव इष्टविभक्तिज्ञानमपि भवति।

६. वहुपदानां एकपदीकरणं समासः इति विषये ज्ञानं भवति।

७. समासप्रयोगेन समयलाघवः भवति।

८. यदा काव्ये श्लोकाः लिख्यन्ते तदा समासक्रियमाने छन्दपूर्तिः भवति।

९. पानिनिना उक्तं समासश्चतुर्विधः। परन्तु समासस्य अवान्तरभेदानां ज्ञानं वर्तते।

१०. समासे समस्यपदानां विभक्तेः लोपः भवति।

११. सन्धिज्ञानं आवश्यकम् कारणं समासे सन्धिः अवश्येव करणीयः।

१२. समासे पञ्चवृत्तीनां ज्ञानमपि भवति।

१३. सूत्राणां प्रयोगेन समासवद्धपदं निर्मातुं समर्थाः स्युः।

१४. कारके समासे च उदाहरणेभ्येः सामाजिक-द्रव्याणां वस्तूनां वा ज्ञानं भवति।

१२.<u>भाषाविज्ञानम्</u>

१. भाषाणां प्रकृतेः ,आकारस्य, नानाविधपरिवर्तनस्य च ज्ञानं भवति।

२. भाषावंशस्य ज्ञानं भवति।

३. भाषाणां पारस्परिकसम्वन्धस्य ज्ञानं भवति।

४. भाषाविज्ञानानां वर्गीकरणम्, भाषाविज्ञानस्याङ्गानि, ध्वनिवर्गीकरणम्, अर्थपरिवर्तनमित्यादिविषये ज्ञानं भवेत्।

५. ग्रिमनियमः, ग्रसमननियमः, वर्नरनियमः इति प्रसिद्धाः त्रिविधाः ध्वनिनियमाः संक्षेपेण प्रस्तूयन्ते।

६. वैदिकसंस्कृतभाषया सह लौकिकसंस्कृतभाषायाः तुलनात्मकं आलोचनं कर्तुं शक्यते।

१३. छन्दोशास्त्रम्

१. छन्दोज्ञानं विना श्लोकस्य पद्यस्य वा अस्तित्वं नास्ति। अतः छन्दज्ञानं आवश्यकम्।

२. छन्दःप्रयोगेण श्लोकस्य श्रुतिमाधुर्यं भवेत्।

३. छन्दसः निर्वचनानि, उत्पत्तिः क्रमविकाशः गुरूत्वं इत्यादिविषये ज्ञानं भवति।

४. विभिन्नशब्दयोगेन यतिज्ञानं, दश-गणज्ञानं, गणेषु लघु-गुरुज्ञानं च भवति।

५. अक्षरतारतम्येन छन्दोविशेषाणां ज्ञानं भवति।

६. उपरोक्तकारणेन श्लोकानां छन्दोनिर्धारयितुं समर्थाः स्युः।

१४.<u>धर्मशास्त्रम्</u>

१. धर्मशव्दस्य व्युत्पत्तिः, उत्सः, उपादानमित्यादिविषये ज्ञानं भवति।

२. धर्मशास्त्रकारस्य आचार्यमनोः संक्षिप्त-परिचयः प्राप्यते।

३. प्राचीन-भारतस्य राजोत्पत्तिः, दण्डनीतिव्यवस्था, दूर्गनिर्माणम्, करग्रहणम्, राज्ञः आत्मरक्षा-इत्यादिविषये ज्ञानं भवति।

४. स्मृतिशास्त्रकारस्य याज्ञवल्क्यस्य परिचयः प्राप्यते।

५. प्राचीन-भारतीयविचारव्यवस्थया सह आधुनिकविचारब्यवस्थायाः तुलनात्मकं आलोचनं कर्तुं शक्यते।

६. सम्पत्तेः उत्तराधिकारः, ऋणस्य बृद्धिः, ऋणपरिशोधः, त्रिविधप्रमाणं, षष्टांशकरः, साक्षी, स्त्रीसम्पत्तेः अधिकारः, सीमाविवादः इत्यादिप्रात्यहिकजीवनस्य समस्यायाः समाधानमत्र सुष्ठुतया वर्णितम्।

७. प्राचीन-भारतीय-धर्मार्थ-राजनीतिशास्त्रेषु महामति-कौटिल्यस्य अवदानं प्राप्यते।

८. प्राचीन-भारतस्य वर्णाश्रमब्यवस्थायाः विवरणं ज्ञायते।

९. सप्ताङ्गराष्ट्रव्यवस्था, मन्त्रणा, दूतनियोगपद्धतिः, षाड्गुण्यम्, गुप्तचरनियोगः, अमात्यनियोगः इत्यादिराजनीतिसंक्रान्तविषये ज्ञानं भवति।

१०. भारद्वाजः, विशालाक्षः, पराशरः, पिशुनः, व्यातव्याधिः इत्यादिपूर्वाचार्याणां परिचयः ज्ञायते।

११. धर्मसूत्र-धर्मशास्त्रयोर्मध्ये वैषम्यस्य ज्ञानं प्राप्यते।

१२. धर्मशास्त्रस्य विषयवस्तूनां, अपि च विभिन्नधर्मशास्त्रकाराणां रचनासम्पर्के धारणा भवति।

१३. वङ्गीयधर्मशास्त्रकाराणां संक्षिप्त-परिचयः प्राप्यते।

१५. <u>दर्शनम्</u>

१. दर्शनशब्दस्य व्युत्पत्तेः, भारतीयदर्शनस्य साधारणवैशिष्ट्यानां ज्ञानं भवति।

२. आस्तिक-नास्तिकदर्शनसम्प्रदायानां संक्षिप्तपरिचयः प्राप्यते।

३. भारतीयदर्शने चार्वाकानां स्थानं अवगम्यते।

४. जैनदर्शने अनेकान्तवादः,स्याद्वादः, त्रिरत्नः इत्यादिविषये ज्ञानं भवति।

५. वौद्धदर्शने विभिन्नसम्प्रदायानां परिचयः प्राप्यते।

६. योगदर्शने अष्टाङ्गयोगः, चित्तवृत्तेः निरोधः इत्यादिविषये ज्ञानं भवति।

७. मीमांसादर्शने सगुण-निर्गुणब्रह्मणोर्मध्ये भेदनिर्मातुं शक्यते।

८. ब्रह्मणः स्वरूपविषये अद्वैतवेदान्तस्य वक्तव्यं ज्ञायते।

९. तर्कसंग्रहे तर्कपदस्य अन्नंभट्टस्य च परिचयः प्राप्यते।

१०. ग्रन्थस्य प्रथमे मङ्गलाचरणस्य प्रयोजनीयताविषये ग्रन्थकारेण यदुक्तं तदपि ज्ञानं भवति।

११. अनुवन्धचतुष्टयस्य सार्विकरूपेण ज्ञानं भवति।

१२. न्याय-वैशेषिकदर्शनस्य संक्षिप्तपरिचयः प्राप्यते।

१३. सप्तपदार्थानां उद्देश्यं लक्षणं विभागः इत्यादिविषये ज्ञानं भवति।

१४. द्रव्यस्य नवविभागाः, तेषां लक्षणविषये च ज्ञानं भवति।

१५. कारणं प्रत्यक्षं सन्निकर्षः हेत्वाभासः इत्यादेः लक्षणं विभागश्च ज्ञायते।

१६. <u>संस्कृतसाहित्येतिहासः</u>

१. नाट्यकारभासस्य नाट्यकीर्तीनां परिचयः ज्ञायते।

२. संस्कृतसाहित्ये वियोगान्तनाटकस्य परिचयः प्राप्यते।

३. महाकविकालिदासस्य नाटकानां महाकाव्यानां गीतिकाव्यानां च संक्षिप्तपरिचयः प्राप्यते।

४. कालिदासोत्तरकालस्य नाट्यकारानां अवदानं ज्ञायते। यथा- श्रीहर्षः, राजशेखरः, भवभूतिः, भट्टनारायणः इत्यादयः।

५. कालिदासोत्तरकालस्य महाकाव्यकारानां परिचयः ज्ञायते। यथा- माघः, भट्टिः, भारविः इत्यादयः।

६. संस्कृतसाहित्ये स्त्रीचरित्रवर्जित-राजनीतिमूलनाटकस्य दृष्टान्तरूपेण मुद्राराक्षसस्य परिचयः प्राप्यते।

७. ऐतिहासिककाव्यानां, गीतिकाव्यानां, गद्यसाहित्यानां, कथासाहित्यानां उत्पत्तिः क्रमविकाशविषये च ज्ञायते।

८. कथासाहित्येषु पञ्चतन्त्रं हितोपदेशं इत्यादिग्रन्थेभ्यः सामाजिक-राजनैतिक-अर्थनैतिकचित्रस्य नीतिमूलोपदेशस्य परिचयः प्राप्यते।

१७. <u>सामाजिकवैज्ञानिकप्रायोगिकसाहित्यम्</u>

१. सामाजिकं, वैज्ञानिकं, प्रायोगिकसाहित्यं इत्यादिविषये साधारणज्ञानं प्राप्यते।

२. व्याकरणशास्त्राणां अभिधानशास्त्राणां इत्यादीनां उत्पत्तिः क्रमविकाशश्च ज्ञायते।

३. प्राचीनभारते आयुर्वेदस्य चिकित्याशास्त्रस्य च ज्ञानं भवति।

४. ज्योतिषशास्त्रस्य विकाशः विवर्तनञ्च, यागाय ग्रहनक्षत्राणां अवस्थानं, पक्षं, मासं, ऋतुः, अयनं, संवत्सरं, राशिः, अमावस्या,पूर्णिमा, संक्रान्तिः इत्यादिविषये आलोचना अस्ति।

५. प्राचीनभारतस्य संगीतविद्यायाः, नृत्यविद्यायाः, अभिनयशास्त्रस्य सुपष्टधारणा भवति।

१८. <u>बोधपरीक्षणम्</u>

१. बोधपरीक्षणेन संस्कृतभाषायाः दक्षता वर्धते।

२. संस्कृतवाक्यनिर्माणाय उपायाणां ज्ञानं भवति।

३. देवनागरीलिपिलेखनाय समर्थाः स्युः। अपि च एतां लिपिं प्रति आग्रहं प्रकटयति।

४. संस्कृतभाषायां वर्णितविषयं अन्यभाषासु अनुवादं कर्तुं शक्यते।

१९.<u>अभिज्ञानशकुन्तलम्</u>

१. संस्कृतजगति महाकवि-कालिदासस्स अवदानविषये ज्ञानं भवति।

२. अभिज्ञानशकुन्तलनाटकस्य उत्सरूपेण महाभारते वर्णितस्य दुष्यन्त-शकुन्तलयोः उपाख्यानस्य विवरणं प्राप्यते।

३. नाटकेऽस्मिन् प्रकृत्या सह मानवस्य अच्छेद्यवन्धनस्य दृष्टान्तः प्रापयते।

४. “उपमा कालिदासस्य” इति वाक्यस्य सार्थकप्रयोगः नाटकेऽस्मिन् प्राप्यते।

५. पतिगृहयात्राकाले महर्षिकण्वस्य शकुन्तलां प्रति उपदेशविषये तथा कन्यासम्प्रदानविषये सुपष्टधारना भवति।

६. नाटके वर्णितानां आश्रमवासिनां जीवनचर्चायाः ज्ञानं भवति।

७. नाटके वर्णिता तत्कालस्य सामाजिकावस्था, वर्णाश्रमव्यवस्था, सवर्णविवाहप्रथा, गान्धर्वविवाहः, वहुविवाहः, सम्पत्तेः उत्तराधिकारः इत्यादिविषयस्य परिचयः प्राप्यते।

८. नाटके वर्णिता धीवरवृत्तान्तात् समकालस्य प्रशासनव्यवस्था, चौर्यवृत्तौ प्राणदण्डः, मानवस्य सहजातप्रवृत्तिं प्रति मर्यादा इत्यादिसामाजिक-नैतिक-प्रशासनिकविषयात् सुपष्टधारणा प्राप्यते।

## ऐच्छिकवर्गः(Generic Elective)

### १. प्राथमिकसंस्कृतम्

१. व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्। संस्कृतं हि व्याकरणमूलम्। व्याकरणं विना संस्कृतं न प्रसरति। प्राथमिक व्याकरणज्ञानेन छात्राः संस्कृतं सम्यगवगच्छन्ति।

२. शिक्षार्थिनां शुद्धभाषाज्ञानलाभार्थं व्याकरणमवश्यमध्येतव्यम्। शब्दरूपाणि धातुरूपाणि अव्ययपदानि च ज्ञात्वा संस्कृतेन वार्तालापं कर्तुं शक्ष्यन्ति।

३. संस्कृतं देवभाषेति कथ्यते। अनया देवभाषया वेद-वेदान्त-महाकाव्य-धर्मशास्त्राणि विरचितानि। एतानि शास्त्राणि ज्ञातुं पठितुं वा शब्दरूपाणि धातुरूपाणि प्रत्यय-सन्धि-कारकानि शिक्षार्थिभिः शिक्षणीयानि। नचेत्ते भारतवर्षस्य ऐतिह्यं संस्कृतिं संस्कृतञ्च कदापि सुष्ठु ज्ञातुं न शक्नुवन्ति। अतः शब्दारूपादयः साधारणनियमान् विज्ञाय व्याकरणे पारङ्गताः भविष्यन्ति।

४. कृ-सेवादिधातुरूपाणि तेषां लटादिलकारश्च तथा अस्मद्युष्मदादिशब्दरूपाणीत्येतस्मिन् विषये ज्ञानं लप्स्यन्ते।

५. वाक्यानां पदविश्लेषणाय सन्धि ज्ञानमावश्यकम्। शिष्याः स्वरसन्धयः विसर्गसन्धयश्च पठित्वा काव्यान्तर्गतश्लोकानां तथा वाक्यानां पदच्छेदं कर्तुं शक्नुवन्ति।

६. शतृ-शानजादिप्रत्ययानामध्ययनेन वाच्यपरिवर्तनप्रक्रियामधिगम्य वाक्यानि रचयितुं समर्थाः भविष्यन्ति। पदानां व्युत्पत्तिमपि ज्ञातुं पारयन्ति।

### २. भारतीयाभिलेखशास्त्रं लिपिविज्ञानञ्च

१. भारतवर्षस्य पुरातनमितिवृत्तं छात्रैरवश्यमेव ज्ञेयम्। शिलालेखपठनेन छात्राः राजवंशस्य चरितानि ज्ञास्यन्ति। प्राचीनभारतस्य राजशासनपद्धति विषये ते अवगताः भविष्यन्ति।

२. गुहागात्रेषु उत्कीर्णेभ्यः फलकेभ्यः लिपितत्त्वं ज्ञातुं पारयन्ति। विविधानां लिपिनां परिचयः विद्यार्थिभिः प्राप्यते।

३. ब्राह्मीखरेष्ट्यादयः प्राचीनभारतस्य लिपयः ज्ञायन्ते। ब्राह्मीलिपेः विविधाः प्राच्य-पाश्चात्योत्साः विद्यार्थिभिः विज्ञायन्ते। लिपिविज्ञानेन अशोकसमुद्रगुप्तादीनां राजानामभिलेखादयो पठितुं शक्नुवन्ति।

४. अभिलेखानां काव्यिकमूल्यं विज्ञातं भविष्यति।

५. अभिलेखपठनेन प्राचीनराजतन्त्रभारतस्य समाजजीवनं चिकित्साव्यवस्था जनसेवा धर्मव्यवस्था राष्ट्रनीतयः शिक्षा शिल्पकला खाद्याभ्यासः जीवनचर्या च इत्येते विषयाः पाठकैः विज्ञायन्ते।

६. पुरालिपिविज्ञानेन विविधमातृकानामध्ययनेन भारतस्येतिहासं साहित्यमर्थनैतिकस्थितिं प्रशासनव्यवस्थां प्रशस्तिं दानपत्रं च छात्राः अवगमिष्यन्ति।

७. मातृकालेखनोपकरणानां ज्ञानम्। मातृकासु व्यवहृताः लिपयः पठनसमर्थाः भवेयुः।

८. भारतीय शिलालेखाध्ययनस्येतिहासस्तथा शिलालेखाध्ययने प्रिन्सेप-ओझादीनां विविधाानां विदुषामवदानम् विचिकित्सुकैः छात्रैः अवगम्यते।

९. शकाब्द-विक्रमाब्दादीनां भारतीयकालानं गणनापद्धतिविषये सविशेषं ज्ञानं भविष्यति।

**<u>कार्यक्रमस्य परिणामः (Programme Outcome)</u>**

१. **काव्यशास्त्रस्य नाट्यशास्त्रस्य च धारणा**

काव्यशास्त्रं नाम दृश्यश्रव्यात्मककाव्यस्य लक्षणादिनिरूपकं शास्त्रम्। रामायणमहाभारतादि जातीयमहाकाव्यं पठित्वा अध्येतारः भारतस्य इतिहासवेत्ता भविष्यन्ति

समाजे रामयुधिष्ठिरादिवद्वर्त्तिष्यन्ति च। रघुवंश-शिशुपालादिमहाकाव्यानुशीलनेन सृष्टिस्रष्टृविषये निपुणतां प्राप्स्यन्ति। कादम्बर्यादिगद्यकाव्येषु निहितानां नैतिकोपदेशानां मननेन छात्राः संयतेन्द्रियाः उदारचरिताश्च भवेयुः। अभिज्ञानशकुन्तलादिदृश्यकाव्येषु प्रतिफलितनायकादिनां चरित्रं तथा च नाट्यकारस्य नाट्यप्रयोगं सम्यगवगच्छन्ति। साहित्यदर्पणकाव्यालंकारसूत्रवृत्त्यादिकाव्यतत्त्वग्रन्थाध्ययनेन काव्यानां लक्षणवैशिष्ट्यश्रेण्यादिनिरूपयितुं शक्नुवन्ति। नाट्यशास्त्रस्य ग्रन्थाध्ययनेन नाटके निहितानां सन्धिकार्यावस्थादिनां बोधो भविष्यति।

## २. संस्कृतभाषाज्ञानम्

संस्कृतभाषा भारतवर्षस्य प्राणस्वरूपा। इमां भाषां ज्ञात्वा प्राचीनशास्त्राणामर्थो बोद्धुं शक्नुवन्ति। संस्कृतभाषा सम्पूर्णरूपेण वैज्ञानिकी भाषा। भाषाविज्ञानदृष्ट्या संस्कृतस्याधयनमवश्यं प्रयोजनम्। भारतवर्षस्य कलासम्पत्मातृकासु सन्निहिताः वर्तन्ते। प्रायः बहुमातृकाः संस्कृतभाषया रचिताः। अतः मातृकानामर्थावबोधे संस्कृतभाषाज्ञानमावश्यकम्। संस्कृतभाषज्ञानेन शास्त्राणां निगूढार्थो ज्ञायते। भारोपीयभाषापरिवारस्य सर्वोत्कृष्टा समृद्धा भाषा भवति संस्कृतम्। अमूभ्यः भाषाभ्यः अपराः भाषाः सञ्जाताः ऋणग्रस्ता च। अतः अपरभाषाज्ञानाय अपि संस्कृतं सहायो भविष्यति। संस्कृतभाषाविज्ञानेन शारीरिकं मानसिकमध्यात्मिकं च सौष्ठुवं प्राप्स्यन्ते।

## ३. विविधलिपिज्ञानम्

संस्कृतभाषा देवनागरीलिप्या लिख्यते। भारतस्य प्राचीनाः सर्वे ग्रन्थाः संस्कृतभाषया देवनागरीलिप्या च लिखिताः वर्तन्ते। अतः संस्कृतभाषापठनाय देवनागरीलिपिज्ञानं प्रयोजनम्। देवनागरीलिपिज्ञानेन छात्राः अपराः हिन्द्यादिलिपयः विज्ञातुं समर्थाः भवन्ति। न केवलं देवनागरीलिपि पाठ्यते अपि च भारतस्य सर्वप्राचीना लिपि ब्राह्मी पाठ्यते। ब्राह्मीलिपेः

अपराः लिपयः सञ्जाताः अतः तस्याः पठनेन अन्यलिपीः विज्ञातुं शक्ष्यन्ते। ब्राह्मी-सारदा-खरेष्ठ्यादिलिपीनां कालः, उद्भवः विकाशश्च छात्रैः ज्ञायन्ते। प्राचीनाभिलेखाः राजशासनपत्राणि पाण्डुलिपयः च पठितुं तत्र वर्णितविषयज्ञातुं शक्नुवन्ति। लिपितत्त्वमधीत्य ग्रन्थानां रचनाकालः निर्णेतुं समर्था भविष्यन्ति। उच्चशिक्षासु लिपिविज्ञानस्य महद्गुरुत्वं वर्तते। तत्र छात्रा प्रवेशार्हतां प्राप्नुवन्ति।

**४. नीतिशिक्षाज्ञानम्**

संस्कृतसाहित्यस्य प्रायः सर्वत्रमेव नीतिशिक्षायाः उपदेशान् प्राप्यन्ते। रामायणादारभ्य नीतिशतकं यावत् प्रत्येकं ग्रन्थस्य मूलविषयस्तावत् नीतिशिक्षादानम्। छात्राः एतान् ग्रन्थानधीत्य स्वजीवने सच्चरित्रवन्तः भविष्यन्ति। धर्मार्थनीतिशास्त्रादीनधीत्य संस्कारविषये विचारव्यवस्थाविषये समाजव्यवहारविषये शासनकार्ये च निष्णाताः भविष्यन्ति। दायभागविषयान् स्वाधिकारविषयान् ऋणादानप्रदानान् च ज्ञातुं शक्नुवन्ति। नीतिमूलकान् ग्रन्थानधीत्य सामाजिककर्त्तव्यानि स्वकार्याणि च ज्ञायन्ते। नीतिश्लोकान् सुभाषितवचनरूपेण समाजे साहित्ये संस्कृतौ अन्येषु कार्येषु च प्रयुजन्ते। उच्चशिक्षायां विविधेषु क्षेत्रेषु धर्मार्थस्मृतिनीतिशास्त्राणि अध्येतुं शक्नुवन्ति।

**५. तर्कशास्त्रे व्युत्पत्तिः**

तर्कसम्बन्धि युक्तिसम्बन्धि वा यत् ज्ञानं तद्धि तर्कशास्त्रं युक्तिशास्त्रं वेति। तर्कशास्त्रं शिक्षार्थिणां चिन्तनं वोधनं वा वर्धयति। यतस्तर्कशास्त्रं हि चिन्तायाः मूलसूत्रानुसारि विज्ञानम्। तर्कशास्त्रं शिक्षार्थिनो यथोचितवृत्तिविषयान् ज्ञापयति।अपि च कथं मन्दमशुद्धं वा विमर्शं परित्यज्य सद्भावनां लभेत। तदपि तान् शिक्षयति। शास्त्रमिदमधीत्य ते प्रयोगविषयकं तत्त्वसम्बन्धिनमुपयोगञ्च ज्ञातुं शक्नुवन्ति। यतः तर्कसास्त्रं नीतिसूत्रादिविषयाणां ज्ञानं सन्ततं

प्रदातुं चेष्ठते। तर्कशास्त्रं यतः युक्तिविषयकं विज्ञानं तर्हि युक्त्या, यथार्थसिद्धपक्षस्थापने अपराणां विज्ञानशास्त्राणामपि तर्कशास्त्रमवलम्बनीयमिति।

**निर्दिष्टकार्यक्रमस्य परिणामः (Programme Specific Outcome)**

संस्कृतं नाम दैवीवाक् अन्बाख्याता महर्षिभिः। इन्दो-इउरोपीयभाषापरिवारस्य सर्बश्रेष्ठा भाषा खलु इयं भाषा। प्राचीनभारतीयसाहित्यज्ञानाय, इतिहासज्ञानाय, धर्मज्ञानाय, सामाजिकजीवनज्ञानाय च संस्कृतस्य महत् गुरूत्वं वर्तते। भारतवर्षस्य जातीयमहाकाव्यद्वयं रामायणं महाभारतञ्च अनया भाषया विरचितम्। पञ्चतन्त्रात् आरभ्य श्रीमद्भगवदगीतापर्यन्त्यं प्रायः सर्वत्र नैतिकतायाः आदर्शः सम्यक्-विहितः। भारतवर्षस्य ऐतिह्यं, आयुर्वेदशास्त्रं, गणितशास्त्रं, ज्योतिर्विज्ञानं, वास्तुशास्त्रं, नाट्यशास्त्रं प्रभृतयः विषयाः संस्कृतसन्बद्धाः।

१. भारतवर्षस्य इतिहासे दर्शने साहित्ये च धारणायाः विकाशः विद्यते।

२. संस्कृतस्य पठने लेखने अववोधने कथने च सम्यक्धारणा भवेत्।

३. देवनागरीलिपिज्ञानेन अन्यासां लिपिनां अवगमनं भवति। यथा- हिन्दी, माराठी च।

४. संस्कृतविषये निहितानां विशेषक्षेत्राणां सुपष्टा धारणा भविष्यति। यथा- वेदः, साहित्यम्, दर्शनम्, धर्मशास्त्रम् च।

५. उच्चशिक्षासु प्रवेशयोग्याः भवेयुः।

६. छात्राणां मौलिकचिन्ताविकाशे सहायताप्रदानम् भवेत्।

७. संस्कृतविषये विविधक्षेत्रे गवेषणायाः औचित्यं प्रकटति।

८. संस्कृतसाहित्यस्य विविधविशेषक्षेत्राणां सम्यक्बोधः तेषां प्रयोजनानि च अनुभूयन्ते।

९. स्नातकस्तरं उत्तीर्य छात्राः कर्मक्षेत्रेषु विविधपरीक्षाणां पात्रतां प्राप्नुवन्ति।

********************************